Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ वैश्रवणमन्त्र उच्यते —

ओं वैश्रवणाय स्वाहा। ओं पक्वाशाय स्वाहा। ओं पिङ्गलाय स्वाहा। ओं निधिपाय स्वाहा। ओं वित्तेशाय स्वाहा। ओं कुवेराय स्वाहा। ओं भूः स्वाहा। ओं भुवः स्वाहा। ओं सुवः स्वाहा। ओं भूर्भुवस्वः स्वाहा ॥ १० ॥
एते दश कुवेरमन्त्राः ॥ ऋष्यादयः प्रसिद्धाः ॥

वित्तेशस्यान्तराळे दशवटसमिधस्सर्पिषाक्ता विविक्ताः
होतव्या द्रव्यसिध्यै कनकघटकरण्डात्तदोस्तुन्दिलोसौ।
हेमाभो रत्नदीपोदरकमलनिधिद्योतिते हेमपीठे
ध्येयो न्यग्रोधमूले हुतभुजि विदुषा वैश्वदेवावसाने ॥

मन्त्रैरेतैर्घृतयुतपायसहोमोपि मन्त्रिणां विहितः।
लक्ष्म्यै सघृतैश्च तिलैर्बिल्वसमिद्धोमतस्तदेव फलम् ॥

अस्यार्थः — वटसमिधो दशसंख्यमाज्यसिक्ता वैश्रवणमन्त्रेषु वित्तेशाय स्वाहेत्यनेन मन्त्रेण जुहुयात् द्रव्यसिध्यै कनकघटेत्याद्युक्तप्रकारेण ध्यात्वा ॥

प्रयोगान्तरम् —

वैश्वदेवावसानेऽग्नौ घृतसिक्तेन पायसेन जुहुयाल्लक्ष्म्यै। घृतसिक्तैस्तिलैश्च बिल्वसमिद्भिश्च जुहुयाल्लक्ष्म्यै ॥